# 5 Critical edition of Sūtrasthāna 16

अथातः कर्ण्णव्यधविधिं व्याख्यास्यामः ॥ १ ॥ 1.16.1

रक्षाभूषणनिमित्तम्बालस्य कर्ण्णौ व्यधयेत्। तौ षष्ठे मासे सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृतमङ्गलस्वस्तिवाचनं[1] धात्र्यङ्के कुमारमुपवेश्याभिसान्त्वयमानो[2] भिषग्वामहस्तेनाकृष्य कर्ण्णन्दैवकृते छिद्रे दक्षिणहस्तेन ऋजु विध्येत्। दक्षिणं कुमारस्य वामङ्कन्यायाः। प्रतनुं सूच्या बहलमारया ॥ २ ॥ 1.16.3

Witnesses

१--९ अथातः--॰विद्धलिङ्गम्] MSS K, H, and N

MS variants

१ व्याख्यास्यामः] व्या K. ३ सप्तमे] *om.* N. ३--४ ॰मङ्गलस्वस्तिवाचनं] A; ॰मङ्गलं स्वस्तिवाचनं K, H, N. ४ धात्र्यङ्के] धात्र्यङ्को K. ४ कुमार] कुमारकम् N. ५ ऋजु] र्जुम् N H. ६ प्रतनुं] प्रतनू N H.

Variants from Su 1938

१ कर्ण्णव्यधविधिं] कर्णव्यधबन्धविधिमध्यायं A. १ व्याख्यास्यामः] *add.* यथोवाच भगवान्धन्वन्तरिः॥ A. २ व्यधयेत्] विध्येते A. २ मासे] मासि A. ४ धात्र्यङ्के] *add.* कुमारधराङ्के वा A. ४ मुपवेश्याभिसान्त्वयमानो] उपवेश्य बालक्रीडनकैः प्रलोभ्याभिसान्त्वयन् A. ५ कर्ण्णन्] कर्णं A. ५ छिद्रे] छिद्र A. ५ छिद्रे] *add.* आदित्यकरावभासिते शनैः शनैर् A. ५ ऋजु] र्जु A ६ विध्येत्] *add.* प्रतनुकं सूच्या बहलमारया A. ६ कन्यायाः] कुमार्याः A. ७ आरया] *add.* ततः पिचुवर्तिं प्रवेशयेत्॥ A.

Notes

[1] The compound कृतमङ्गलस्वस्तिवाचनं is an emendation based on the similar text at 3.2.25 (Su 1938: 346).

[2] The *ātmanepada* participle is a permitted form, although the vulgate has the *parasmaipada*. Ḍalhaṇa, on 1.16.3 (Su 1938: 76), recorded the alternative reading भक्ष्यविशेषैर्वा before बालक्रीडनकैः प्रलोभ्य in the vulgate.

शोणितबहुत्वेऽतिवेदनायां चान्यदेशविद्धमिति जानी-
यात्। निरुपद्रवता तद्देशविद्धलिङ्गम् ॥ ३ ॥ 1.16.4
तत्र यदृच्छाविद्धायां सिरायामङ्गेन ज्वरदाहश्वयथुवे-
दनाग्रन्थिमन्यास्तम्भापतानकशिरोग्रहकर्णशूलानि
भवन्ति ॥ ४ ॥ 1.16.5
दोषसमुदयादप्रशस्तव्यधाद्वा तत्र वर्त्तिमपहृत्य यवमधुक-
मञ्जिष्ठागन्धर्व्वहस्तमूलैर्म्मधुघृतप्रगाढैरालेपयेत्। सुरूढञ्चैन-
म्पुनर्व्विध्येत् ॥ ५ ॥ [3] 1.16.6
सम्यग्विद्धमामतैलपरिषेकेणोपचरेत् । त्र्यहात्त्र्यहाद्वर्त्तिं
स्थूलतरीङ्[4] कुर्व्वीत परिषेकञ्च तमेव ॥ ६ ॥ 1.16.7

Witnesses

१० तत्र ] MSS H and N. From here to the end of 1.16, MS K is missing a folio.

MS variants

१० ०श्वयथु० ] *em.*; ०श्वयथुरु N ; ०श्वयथुर् H. १३–१४ ०गन्धर्व्वहस्तमूलैर् ] ०गन्दर्वहस्तमूलै N. १६ ०परिषेकेणोप० ] ०परिषेकणोप० H. १७ ०तरीङ् ] ०तरीं N

Variants from Su 1938

८ बहुत्वे ] बहुत्वेन A. ८ ऽतिवेदनायां ] वेदनया A. ९ ०द्रवता ] ०द्रवतया A. ९ ०विद्धलिङ्गम् ] ०विद्धमिति A. १० तत्र ] तत्राङ्गेन A. १० यदृच्छाविद्धायां ] यदृच्छया विद्धासु A. १० सिरायाम् ] सिरासु A. १० सिरायाम् ] *add.* कालिकामर्मरिकालोहितिकासूपद्रवा भवन्ति। तत्र कालिकायां A. १० ज्वर० ] ज्वरो १० ०दाह० ] दाहः १० ०श्वयथु० ] श्वयथुर् A. १०–११ ०वेदना० ] *add.* च भवति मर्मरिकायां वेदना ज्वरो A. ११ ०ग्रन्थि० ] ग्रन्थयश् A. ११ ०ग्रन्थि० ] *add.* च लोहितिकायां A. १२ भवन्ति ] *add.* तेषु यथास्वं प्रतिकुर्वीत॥ क्लिष्टजिह्माप्रशस्तसूचीव्यधाद्गाढतरवर्तित्वाद् A. १३ वा ] *add.* यत्र संरम्भो वेदना वा भवति A. १३ अपहृत्य ] उपहृत्याशु A. १३–१४ यवमधुक० ] मधुकैरण्डमूल० A. १३–१४ ०मञ्जिष्ठागन्धर्व्वहस्तमूलैर् ] ०मञ्जिष्ठायवतिलकल्कैर् A. १४ आलेपयेत् ] *add.* तावद्यावत्सुरूढ इति॥ A. १५ विध्येत् ] *add.* विधानं तु पूर्वोक्तमेव॥ A. १६ सम्यग्० ] तत्र सम्यग्० A. १६ आमतैलपरिषेकेणोपचरेत् ] आमतैलेन परिषेचयेत् A १६ त्र्यहाद् ] *add.* च A. १७ ०तरीङ् ] ०तरां A १७ कुर्व्वीत ] दद्यात् A.

Notes

[3] Ḍalhaṇa, on 1.16.6 (Su 1938: 77), stated that some do not read सुरूढञ्चैनम्पुनर्विध्येत्.

[4] The unusual form स्थूलतरीं is supported by both manuscripts and we have retained it in spite of only meagre evidence for the form in epic Sanskrit.

अथ व्यपगतदोषोपद्रवे कर्ण्णेऽलंप्रवर्द्धनार्थं लघुप्रवर्द्धनकमामुञ्चेत् ॥७॥ 1.16.8

एवं सम्वर्द्धितः कर्ण्णश्छिद्यते तु द्विधा नृणाम्।
दोषतो वाभिघाताद्वा सन्धानान्तस्य मे शृणु॥८॥ 1.16.9

तत्र समासेन पञ्चदशसन्धानाकृतयो भवन्ति।[५] तद्यथा। नेमीसन्धानकः। उत्पलभेद्यकः। वल्लूरकः। आसङ्गिमः। गण्डकर्ण्णः। आहार्यः। निर्व्वेधिमः। व्यायोजिमः। कपाटसन्धिकः। अर्द्धकपाटसन्धिकः। सङ्क्षिप्तः। हीनकर्ण्णः। वल्लीकर्ण्णः। यष्टीकर्ण्णः। काकौष्ठः। इति। तेषु तत्र पृथुलायतसमोभयपालिर्न्नेमीसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः । ह्रस्ववृत्तसमोभयपालिर्वल्लूरकर्ण्णकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्ग्गण्डकर्ण्णकः। अपालिरुभयतोऽप्याहार्यः। पीठोपमपालिर्न्निर्व्वेधिमः। अणुस्थूलसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितराल्पपालिश्चार्द्ध-

MS variants

१८--१९ लघुप्रवर्द्धनकम्] ल प्रवर्धनकामो N; प्रवर्धनकामा "मै" H. १९ आमुञ्चेत्] *em.*; मुञ्चेत् N H. २० नृणाम्] नृणा N. २१ ] A; दोषटो N H. २३ ०सन्धाना० ] ०सन्धा० N. २६ अर्द्धकपाटसन्धिकः ] *om.* N. २७ काकौष्ठः ] काकौष्ठभः H. २७ इति ] ति H. २७--२८ ०यतसमो० ] A; ०यसमो० H; ०तसमो N. २९ ०भेद्यकः ] ०भेद्यः N; ०भेदकः H. २९ वल्लूर० ] वलूर० N. ३० बाह्य ] A; बाह्यैक N H. ३१--३२ अणुस्थूल० ] अशुस्थूल० H ३३ कपाट० ] कवाटा० H.

Variants from Su 1938

१८ ऽलंप्रवर्द्धनार्थं ] *om.* A. १८--१९ लघुप्रवर्द्धनकम्] लघुव० A १९ आमुञ्चेत्] कुर्यात्॥ A २० सम्वर्द्धितः ] विवर्धितः A. २१ सन्धानान्] सन्धानं A. २३ ०दशसन्धानाकृतयो ] ०दशाकर्णबन्धाकृतयः A. २३ भवन्ति ] *om.* A. २४ नेमी० ] नेमि० A. २६ ०सन्धिकः। अर्द्ध० ] ०सन्धिको ऽर्द्ध०A २७ यष्टी० ] यष्टि० A. २७ काकौष्ठः ] काकौष्ठक A. २७ तत्र ] *om.* A. २८ नेमी० ] नेमि० A. २९ वल्लूर० ] वल्लूरकः A. ३१ पीठोपमपालिर् ] *add.* उभयतः क्षीणपुत्रिकाश्रितो A. ३१--३२ अणुस्थूल० ] स्थूलाणु० A.

Notes

[५] Cakrapāṇidatta, on 1.16.9–13 (Su 1939: 128), and Ḍalhaṇa, on 1.16.10 (Su 1938: 78), pointed out that others read पञ्चदशकर्णकृतयः (instead of पञ्चदशसन्धानाकृतयः). At the same place, Ḍalhaṇa also mentioned that some read समुन्नतसमोभयपालिः (instead of वृत्तायतसमोभयपालिर्) and others do not read संक्षिप्तादयः पञ्चासाध्याः.

कपाटसन्धिकः। तत्रैते दशकर्ण्णसन्धिविकल्पा बन्ध्या भवन्ति। तेषान्नामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्याः। तत्र शुष्कशष्कुलिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्यन्तयोश्च क्षीणमांसो हीनकर्ण्णः। तनुविषमपालिर्वल्लीकर्ण्णः। ग्रन्थितमांसः स्तब्धसिराततसूक्ष्मपालिर्यष्टीकर्ण्णः। निर्म्मांससंक्षिप्ताग्राल्पशोणितपालिः काकौष्ठ इति। बद्धेष्वपि दाहपाकस्रावशोफयुक्ता न सिद्धिमुपयान्ति॥९॥[६] 1.16.10

MS variants

३४ चार्द्धकपाट॰ ] *em.*; वार्द्धकवाट॰ H; चार्द्धकवाप॰ N. ३७ पर्यन्तयोश्च ] *om.* N. ३८ ग्रन्थितमांसः ] ॰ग्रन्थितमान्सः N H. ३९ निर्मांस॰ ] A; निमास॰ N ; निर्म्मान्स॰ H. ४० ॰स्राव॰ ] ॰श्राव॰ H. ४० ॰शोफ॰ ] ॰सोफ॰ N.

Variants from Su 1938

३४ चार्द्ध॰ ] अर्ध॰ A. ३४ तत्रैते ] तत्र A. ३४ दशकर्ण्णसन्धिविकल्पा ] दशैते कर्णबन्धविकल्पाः A. ३५ बन्ध्या भवन्ति ] साध्याः A. ३५ तेषान् ] तेषां A. ३५ नामभिर् ] स्वनामभिर् A. ३६ शुष्कशष्कुलिर् ] *add.* उत्सन्नपालिर् A. ३७ च ] *om.* A. ३७--३८ ॰षमपालिर् ] ॰षमाल्पपालिर् A. ३८ ग्रन्थितमांसः ] ग्रथितमांस॰ A. ३८--३९ ॰सिराततसूक्ष्म॰ ] ॰सिरासंततसूक्ष्म॰ A. ३९--४० काकौष्ठ ] काकौष्ठक A. ४० अपि ] *add.* तु शोफ A. ४० ॰दाह॰ ] *add.* ॰राग॰ A. ४० ॰पाक॰ ] *add.* ॰पिडका॰ A. ४० ॰शोफ॰ ] *om.* A.

Notes

[६] The vulgate passage inserted between 9 and 10 (from भवन्ति चात्र to शास्त्रवित्) was probably also absent in the version of the *Suśrutasaṃhitā* commented on by Cakrapāṇi, who cited it in his commentary as being “read by some” in regard to the joins (सन्धान) that they describe (1.16.9–13 (Su 1939: 128)).

अतोऽन्यतमस्य बन्धश्चिकीर्षुः अग्रोपहरणीयोक्तोपसम्भृतसम्भारः विशेषतश्चात्रोपहरेत्[७] सुरामण्डक्षीरमुदकं धान्याम्लकपालचूर्ण्णञ्चेति। ततोऽङ्गनां पुरुषम्वा ग्रथितकेशान्तं लघुभुक्तवन्तमाप्तैः सुपरिगृहीतं च कृत्वा बन्धानुपधार्य छेद्यभेद्यलेख्यव्यधनैरुपपाद्य कर्ण्णशोणितमवेक्ष्यैतद्दुष्टमदुष्टम्वेति ततो वातदुष्टे धान्याम्लोदकाभ्यां पित्तदुष्टे शीतोदकपयोभ्यां श्लेष्मदुष्टे सुरामण्डोदकाभ्यां प्रक्षाल्य कर्ण्णम्पुनरवलिखेत्। अनुन्नतमहीनमविषमञ्च कर्ण्णसन्धिन्निवेश्य स्थितरक्तं सन्दर्श्य मधुघृतेनाभ्यज्य पिचुप्लोतयोरन्यतरेणावगुण्ठ्य नातिगाढन्नातिशिथिलं सूत्रेणावबध्य कपालचूर्ण्णेनावकीर्याचारिकमुपदिशेत्। द्विव्रणीयोक्तेन चान्नेनोपचरेत् ॥ १० ॥ 1.16.15

MS variants

४३ ] ततो N. ४३--४४ ०पहरणीयो० ] ०पसंहरणीयो० N. ४४ चात्रोपहरेत् ] A; चाग्रोपहरणीयात् N H. ४५ पुरुषम् ] पुरुषञ् N. ४६ च कृत्वा ] A; *om.* N H. ४६ उपधार्य ] उपपाद्य H. ४७ ०शोणितमवेक्ष्यैतद् ] ०शोणितत अवेक्ष्येतद् N. ४७ अदुष्टम् ] अदुष्टश् N. ४७ वेति ] A; चेति N H. ४८ धान्याम्लो० ] धान्याम्लो० N ४८ शीतोदक० ] शीतोदको० N. ४९--५० अवलिखेत् ] अवलिखेत N. ५० ०सन्धिन् ] ०सन्धिं N ५१ ०गुण्ठ्य ] ०गुण्ठ्यो H. ५१ ०गाढन् ] ०गाढं N. ५२ ०बध्य ] ०बद्ध N. ५३ चान्नेनोपचरेत् ] उपपोचरेत् N. ५३ ॥ १० ॥ ] *add.* भ N.

Variants from Su 1938

४२ *inserted passage* ] भवन्ति चात्र। यस्य पालिद्वयमपि कर्णस्य न भवेदिह। कर्णपीठं समे मध्ये तस्य विद्ध्वा विवर्धयेत्॥ बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत्। आभ्यन्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः॥ एकैव तु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या। तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत्॥ गण्डादुत्पाट्य मांसेन सानुबन्धेन जीवता। कर्णपालीमापालेस्तु कुर्यान्निर्लिख्य शास्त्रवित्॥ A. ४३ अतोऽन्यतमस्य ] ऽन्यतमं A. ४३--४४ ०सम्भारः ] ०सम्भारं A. ४४ सुरामण्डक्षीरम् ] सुरामण्डं क्षीरम् A. ४४--४५ धान्याम्लकपाल० ] धान्याम्लं कपाल० A. ४६ बन्धान् ] बन्धम् A. ४६--४७ ०व्यधनैर् ] *add.* उपपन्नैर् A. ४७ अवेक्ष्यैतद् ] अवेक्ष्य A. ४८ ततो ] तत्र A. ४८ धान्याम्लोदका० ] धान्याम्लोष्णोदका० A. ४९ ०मण्डोदका० ] ०मण्डोष्णोदका० A. ४९ कर्ण्णम् ] कर्णौ A. ४९--५० अवलिखेत्। अनुन्नतम् ] अवलिख्यानुन्नतम् A. ५० ०सन्धिन् ] ०सन्धिं A ५० निवेश्य ] सन्निवेश्य A. ५० सन्दर्श्य ] सन्दध्यात् A. ५० सन्दर्श्य ] *add.* ततो A. ५१ नातिगाढन् ] सूत्रेणानवगाढमन् A. ५१--५२ नाति० ] अति० A. ५२ सूत्रेणावबध्य ] च बद्ध्वा A. ५३ चान्नेनोपचरेत् ] च विधानेनोपचरेत् A. ५३ ॥ १० ॥ ] *add.* भवति चात्र। A.

Notes

[७]विशेषतश्चाग्रोपहरणीयात् of the MSS has been emended to विशेषतश्चात्रोपहरेत् to make sense of the list of ingredients, which is in the accusative case. Also, the repetition of अग्रोपहरणीयात् in the Nepalese version suggests that its second occurrence, which does not make good sense here, is a dittographic error.

विघट्टनन्दिवास्वप्नं व्यायाममतिभोजनम् ।
व्यवायमग्निसन्तापम्वाक्श्रमञ्च विवर्ज्जयेत्॥ ११॥ 1.16.16

नातिशुद्धरक्तमतिप्रवृत्तरक्तं क्षीणरक्तं वा सन्दध्यात्। स
हि वातदुष्टे रक्तबद्धोऽरूढो परिपुटनवान्भवति। पित्तदुष्टे गाढ-
पाकरागवान्। श्लेष्मदुष्टे स्तब्धकर्ण्णः कण्डूमानतिप्रवृत्तस्रावः
शोफवान्क्षीणाल्पमांसो न वृद्धिमुपैति॥ १२॥ 1.16.17

स यदा रूढो निरुपद्रवः कर्ण्णो भवति तदैनं शनैः शनैर-
भिवर्द्धयेत्। अन्यथा संरम्भदाहपाकवेदनावान्भवति। पुनरपि
छिद्येत ॥ १३॥ 1.16.18

MS variants

५४ विघट्टनन्] विघट्टनं N. ५५ अग्निसन्तापम्] आग्निसन्ताप N. ५५ विवर्ज्जयेत्] वर्ज-येत् N. ५६ ०शुद्ध०] ०सुद्ध० N. ५६ ०वृत्तरक्तं] ०वृत्तं रक्तं N. ५७ रक्तबद्धोऽरूढो] *em.*; रक्तवद्धो रुढो N; रक्तबद्धो रूढो H. ५७ ०पुटनवान्] ०पुटवाम् N; ०पुटनवाम् H. ५७ ०दुष्टे] ०दुष्टै N. ५८ श्लेष्म०] श्लेष० N. ५८ ०कर्ण्णः] ०वर्ण्णः N. ५८ ०स्रावः] ०श्रावः H. ५९ क्षीणाल्प०] क्षीणो ल्प० N. ६० रूढो] रुढो N. ६१ ०पाकवेदनावान्] ०पाकरागवेदनावान् N; ०पाकवेदनावाम् H.

Variants from Su 1938

५४ विघट्टनन्] विघट्टनं A. ५६ नाति०] न चाशु० A. ५७ रक्तबद्धोऽरूढो] रक्ते रूढोऽपि A. ५७ भवति] *om.* A. ५८ गाढपाकरागवान्] दाहपाकरागवेदनावान् A. ५८ स्तब्ध०] स्तब्धः A. ५८--५९ ०वृत्तस्रावः शोफवान्] ०वृत्तरक्ते श्यावशोफवान् A. ५९ क्षीणाल्प०] क्षीणोऽल्प० A. ६० *inserted passage*] आमतैलेन त्रिरात्रं परिषेचयेत्त्रिरात्राच्च पिचुं परिव-र्तयेत्। A. ६० रूढो] सुरूढो A. ६० कर्ण्णो] सवर्णो A. ६१ अन्यथा] अतोऽन्यथा A. ६१ ०पाकवेदनावान्] ०पाकरागवेदनावान् A. ६१ भवति] *om.* A. ६१ अपि] *om.* A. ६२ छिद्येत] छिद्यते वा A.

अथाप्रदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः। गोधाप्रतुदविष्कि-
रानूपौदकवसामज्जापयस्तैलं गौरसर्षपजञ्च यथालाभं
संभृत्यार्कालर्कबलातिबलानन्ताविदारीमधुकजलशूकप्रति-
वापन्तैलम्पाचयित्वा स्वनुगुप्तन्निदध्यात् ॥ १४ ॥[८] 1.16.19

स्वेदितो मर्दितङ्कर्ण्णमनेन म्रक्षयेद्बुधः।
ततोऽनुपद्रवः सम्यग्बलवांश्च विवर्द्धते ॥ १५ ॥[९] 1.16.20

ये तु कर्ण्णा न वर्द्धन्ते स्नेहस्वेदोपपादिताः।
तेषामपाङ्गे त्वबहिः कुर्यात्प्रछानमेव च ॥ १६ ॥[१०] 1.16.22cd-23ab

MS variants

६३ अथाप्र॰ ] अथास्याः प्र॰ H. ६३ ॰दुष्टस्याभिवर्द्धनार्थम् ] ॰दुष्टस्याविवर्धनार्थम् N. ६५--६६ ॰आर्कालर्कबलाति॰ ] ॰आर्कालकवलाति॰ N. ६५--६६ ॰प्रतिवापन् ] ॰प्रतिवापं N. ६६ ॰गुप्तन् ] ॰गुप्तं N. ६६ निदध्यात् ] निदद्यात् N. ६७ स्वेदितो ] स्वदितो N. ६७ अनेन ] अने $\mathcal{X}$ N. ६८ ततोऽनुपद्रवः ] ततो नुपद्रवः H; ततो नुपद्रवम् N. ७० अबहिः ] अवर्हि N. ७० कुर्यात् ] कुयात् N. ७० प्रछानम् ] प्रछन्नम् H.

Variants from Su 1938

६३ अथाप्र॰ ] अथास्याप्र॰ A. ६३ अभ्यङ्गः ] *add.* तद्यथा A. ६३--६४ ॰मज्जापयस्तैलं ] ॰मज्जानौ पयः सर्पिस्तैलं A. ६५--६६ ॰बलानन्ता॰ ] ॰बलानन्तापामार्गाश्वगन्धा A. ६५--६६ ॰विदारीमधुकजलशूक॰ ] ॰विदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गपयस्या॰ ६५--६६ ॰प्रतिवापन् ] ॰प्रतिवापं A. ६६ तैलम् ] *add.* वा A. ६६ ॰गुप्तन् ] ॰गुप्तं A. ६७ स्वेदितो मर्दितङ् ] स्वेदितोन्मर्दितं A. ६७ अनेन म्रक्षयेद्बुधः ] स्नेहेनैतेन योजयेत् A. ६९ *inserted passage* ] यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्तनं हितम्। शतावर्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः॥ तैलं विपक्वं सक्षीरमभ्यङ्गात्पालिवर्धनम्। A. ६९ स्नेहस्वेदोप॰ ] स्वेदस्नेहोप॰ A. ७० अपाङ्गे त्वबहिः ] अपाङ्गदेशे तु A. ७० च ] तु A.

Notes

[८] Ḍalhaṇa, on 1.16.19 (Su 1938: 79), noted that some read राजसर्षपजं in the place of गौरसर्षपजं. This reading appears to have been accepted by Cakrapāṇi, who glossed राजसर्षपज as श्वेतसर्षप (1.16.18–20 (Su 1939: 130)). Cakrapāṇi also said that some read sarpis in the place of पयस्. In the compound beginning with अर्क, Ḍalhaṇa noted that some read अर्कपुष्पी.

[९] N has a काकपाद after अने, but the missing letter (one would expect `न') has not been supplied in a margin or elsewhere.

[१०] Ḍalhaṇa, on 1.16.23 (Su 1938: 80), noted that some read तेषामपाङ्गच्छेद्यं हि कार्यमाभ्यन्तरं भवेत्.

अमिताः कर्ण्णबन्धास्तु विज्ञेयाः कुशलैरिह ।
यो यथा सुनिविष्टः स्यात्तत्तथा यो-
जयेद्भिषक् ॥ १७ ॥ [११] 1.16.26.1

जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः ।
सुरूढोऽवेदनो यस्तु तं कर्ण्णं वर्द्धयेच्छनैः ॥ १८ ॥ 1.16.25

MS variants

७१ ०बन्धास्] ०बन्धो H. ७१ तु] स्तु H. ७२--७३ योजयेद्] योजये N. ७५ सुवर्त्मा] सुपर्मा N; सुवर्म्मा H. ७५ ०सन्धिः] ०सन्धिम् N. ७६ तु] *em.*; तत् N H.

Variants from Su 1938

७१ *inserted passage*] बाह्यच्छेदं न कुर्वीत व्यापदः स्युस्ततो ध्रुवाः ॥ बद्धमात्रं तु यः कर्णं सहसैवाभिवर्धयेत्। आमकोशी समाध्मातः क्षिप्रमेव विमुच्यते ॥ A. ७२ सुनिविष्टः] सुविशिष्टः A. ७२ स्यात्] तं A. ७२--७३ योजयेद्भिषक्] विनियोजयेत् A. ७३ *inserted passage*] (कर्णपाल्यामयान्नृणां पुनर्वक्ष्यामि सुश्रुत !॥ कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः ॥ १ ॥ द्विधा वाऽप्यथ संसृष्टाः कुर्वन्ति विविधा रुजः। विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके दाहविस्फोटजननं शोफः पाकश्च पैत्तिके। कण्डूः सश्वयथुः स्तम्भो गुरुत्वं च कफात्मके ॥ ३ ॥ यथादोषं च संशोध्य कुर्यात्तेषां चिकित्सितम्। स्वेदाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः ॥ ४ ॥ मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा। य एवं वेत्ति दोषाणां चिकित्सां कर्तुमर्हति ॥ ५ ॥ अत ऊर्ध्वं नामलिङ्गैर्वक्ष्ये पाल्यामुपद्रवान् ॥ अत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशम् ॥ ६ ॥ अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा ॥ स्रावी च दाहवांश्चैव शृण्वेषां क्रमशः क्रियाम् ॥ ७ ॥ अपामार्गः सर्जरसः पाटलालकुचत्वचौ ॥ उत्पाटके प्रलेपः स्यात्तैलमेभिश्च पाचयेत् ॥ ८ ॥ शम्पाकशिग्रुपूतीकान्गोदामेदोऽथ तद्वसाम् ॥ वाराहं गव्यमैणेयं पित्तं सर्पिश्च संसृजेत् ॥ ९ ॥ लेपमुत्पुटके दद्यात्तैलमेभिश्च साधितम् ॥ गौरीं सुगन्धां सश्यामामनन्तां तण्डुलीयकम् ॥ १० ॥ श्यावे प्रलेपनं दद्यात्तैलम् एभिश्च साधितम् ॥ पाठां रसाञ्जनं क्षौद्रं तथा स्यादुष्णकाञ्जिकम् ॥ ११ ॥ दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितम् ॥ व्रणीभूतस्य देयं स्यादिदं तैलं विजानता ॥ १२ ॥ मधुकक्षीरकाकोलीजीवकाद्यैर्विपाचितम् ॥ गोधावराहसर्पाणां वसाः स्युः कृतबृंहणे ॥ १३ ॥ प्रलेपनमिदं दद्यादवसिच्यावमन्थके ॥ प्रपौण्डरीकं मधुकं समङ्गां धवमेव च ॥ १४ ॥ तैलमेभिश्च संपक्वं शृणु कण्डूमतः क्रियाम् ॥ सहदेवा विश्वदेवा अजाक्षीरं ससैन्धवमेतैरालेपनं दद्यात्तैलम् एभिश्च साधितम् ॥ १५ ॥ ग्रन्थिके गुटिकां पूर्वं स्रावयेदवपाट्य तु ॥ ततः सैन्धवचूर्णं तु घृष्ट्वा लेपं प्रदापयेत् ॥ १६ ॥ लिखित्वा तत्स्रुतं घृष्ट्वा चूर्णैर्लोध्रस्य जम्बुले ॥ क्षीरेण प्रतिसार्यैनं शुद्धं संरोपयेत्ततः ॥ १७ ॥ मधुपर्णीं मधूकं च म मधुकं मधुना सह ॥ लेपः स्राविणि दातव्यस्तैलमेभिश्च साधितम् ॥ १८ ॥ पञ्चवल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ॥ जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥ १९ ॥) A. ७६ यस्तु] च A.

Notes

[११] Ḍalhaṇa, on 1.16.26 (Su 1938: 80), stated that some read सुनिविष्टः (i.e., the reading of the Nepalese version) instead of सुविशिष्टः.

विश्लेषितायामथ नासिकायां
वक्ष्यामि सन्धानविधिं यथावत् ।
नासाप्रमाणं पृथिवीरुहाणां
पत्रं गृहीत्वा त्ववलम्बि तस्य ॥ १९ ॥ [12] 1.16.27

तेन प्रमाणेन हि गण्डपार्श्वाद्
उत्कृत्य वध्रं त्वथ नासिकाग्रम् ।
विलिख्य चाशु प्रतिसन्दधीत
तं साधुबद्धम्भिषगप्रमत्तः ॥ २० ॥ 1.16.28

सुसीवितं सम्यगतो यथावन्
नाडीद्वयेनाभिसमीक्ष्य नह्येत् ।
उन्नामयित्वा त्ववचूर्णयीत
पत्ताङ्गयष्टीमधुकाञ्जनैश्च ॥ २१ ॥ 1.16.29

संछाद्य सम्यक्पिचुना व्रणन्तु
तैलेन सिञ्चेदसकृत्तिलानाम् ।
घृतञ्च पाय्यः स नरः सुजीर्णे
स्निग्धो विरेच्यः स्वयथोपदेशम् ॥ २२ ॥ 1.16.30

MS variants

७७ नासिकायां ] नासिकाया N. ७९ ०प्रमाणं ] ०प्रमाण० N. ७९ ०वीरुहाणां ] ०वीरुहाणम् N. ८० पत्रं ] पत्र N. ८२ वध्रं ] वन्ध्र H. ८४ ०बद्धम् ] ०वद्ध० N. ८५ सुसीवितं ] *em.*; सुसीवित N ; सुशीवितं H. ८८ पत्ताङ्ग० ] *em.*; पत्त्वाङ्ग० H; पत्तङ्ग० N. ८९ व्रणन्तु ] व्रण तुन् N. ९२ विरेच्यः ] A; विरेच्य N H. ९२ ०देशम् ] ०देशः N.

Variants from Su 1938

७७ विश्लेषितायाम् ] विश्लेषितायास्त्व् A. ७७ नासिकायां ] नासिकाया A. ८२ वध्रं ] बद्धं A. ८४ तं ] तत् A. ८४ ०बद्धम् ] ०बन्धैर् A. ८५ सुसीवितं ] सुसंहितं A. ८६ नह्येत् ] बद्ध्वा A. ८७ उन्नामयित्वा ] प्रोन्नम्य चैनाम् A. ८७ अवचूर्णयीत ] अवचूर्णयेत्तु ८८ पत्ताङ्ग० ] पतङ्ग० A. ८९ व्रणन्तु ] सितेन A. ९२ स्वयथो० ] स यथो० A.

Notes

[12] Cakrapāṇidatta, on 1.16.26 (Su 1939: 133), said that others read नासासन्धानविधिम् here. Ḍalhaṇa, on 1.16.27–31 (Su 1938: 81), stated that some read, छिन्नां तु नासिकां दृष्ट्वा वयःस्थस्य शरीरिणः। नासानुरूपं संच्छिद्य पत्रं गण्डे निवेशयेत्॥

रूढञ्च सन्धानमुपागतं वै
तद्बध्रशेषं तु पुनर्निकृन्तेत्।
हीनम्पुनर्वर्द्धयितुं यतेत
समञ्च कुर्यादतिवृद्धमांसम् ॥२३॥ 1.16.31
इति ओम्॥

MS variants

९३ सन्धानम्] सन्धाम् N. ९३ उपागतं] उपागतश् H. ९३ वै] चै H. ९४ ०शेषं] ०सेषन् N. ९५ यतेत] यतेतः N. ९६ ०मांसम्] ०मान्सम् N. ९७ ओम्] *om.* N.

Variants from Su 1938

९३ वै] स्यात् A. ९४ तद्बध्र०] तदर्ध० A ९५ हीनम्] हीनां A. ९६ समञ्] समां A. ९६ ०मांसम्] ०मांसाम् A. ९७ ओम्] *om.* A. ९८ *inserted passage*] नाडीयोगं विनौष्ठस्य नासासन्धानवद्विधिम्। य एवमेव जानीयात्स राज्ञः कर्तुमर्हति॥ A.